**|| শ্রী নৃসিংহ মংত্ররাজপদ স্তোত্রং ||**

পাৰ্ৱত্যুৱাচ –
মন্ত্রাণাং পরমং মন্ত্রং গুহ্যানাং গুহ্যমেৱ চ |
ব্রূহি মে নারসিংহস্য তত্ত্বং মন্ত্রস্য দুর্লভম্ ||
শংকর উৱাচ –
ৱৃত্তোত্ফুল্লৱিশালাক্ষং ৱিপক্ষক্ষযদীক্ষিতং |
নিনাদত্রস্তৱিশ্বাণ্ডং ৱিষ্ণুমুগ্রং নমাম্যহম্ || ১ ||
সৰ্ৱৈরৱধ্যতাং প্রাপ্তং সবলৌঘং দিতেস্সুতং |
নখাগ্রৈশ্শকলীচক্রেযস্তং ৱীরং নমাম্যহম্ || ২ ||
পাদাৱষ্টব্ধপাতালং মূর্ধাঽঽৱিষ্টত্রিৱিষ্টপং |
ভুজপ্রৱিষ্টাষ্টদিশং মহাৱিষ্ণুং নমাম্যহম্ || ৩ ||
জ্যোতীংষ্যর্কেন্দুনক্ষত্রজ্বলনাদীন্যনুক্রমাত্ |
জ্বলন্তি তেজসা যস্য তং জ্বলন্তং নমাম্যহম্ || ৪ ||
সৰ্ৱেন্দ্রিযৈরপি ৱিনা সৰ্ৱং সৰ্ৱত্র সৰ্ৱদা |
জানাতি যো নমাম্যাদ্যং তমহং সৰ্ৱতোমুখম্ || ৫ ||
নরৱত্সিংহৱচ্চৈৱ রূপং যস্য মহাত্মনঃ |
মহাসটং মহাদংষ্ট্রং তং নৃসিংহং নমাম্যহম্ || ৬ ||
যন্নামস্মরণাদ্ভীতা ভূতৱেতালরাক্ষসাঃ |
রোগাদ্যাশ্চ প্রণশ্যন্তি ভীষণং তং নমাম্যহম্ || ৭ ||
সৰ্ৱেঽপি যং সমাশ্রিত্য সকলং ভদ্রমশ্নুতে |
শ্রিযা চ ভদ্রযা জুষ্টো যস্তং ভদ্রং নমাম্যহম্ || ৮ ||
সাক্ষাত্স্ৱকালে সম্প্রাপ্তং মৃত্যুং শত্রুগণানপি |
ভক্তানাং নাশযেদ্যস্তু মৃত্যুমৃত্যুং নমাম্যহম্ || ৯ ||
নমস্কারাত্মকং যস্মৈ ৱিধাযাত্মনিৱেদনং |
ত্যক্তদুঃখোঽখিলান্কামানশ্নুতে তং নমাম্যহম্ || ১০ ||
দাসভূতাস্স্ৱতস্সৰ্ৱে হ্যাত্মানঃ পরমাত্মনঃ |
অতোঽহমপি তে দাস ইতি মত্ৱা নমাম্যহম্ || ১১ ||
শংকরেণাদরাত্প্রোক্তং পদানাং তত্ত্ৱমুত্তমং |
ত্রিসন্ধ্যং যো জপেত্তস্য ৱিদ্যাঽঽযুশ্শ্রীশ্চ ৱর্ধতে || ১২ ||
ইতি শ্রী শংকরকৃত শ্রীনৃসিংহমংত্ররাজপদস্তোত্রম্